नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 25

No. of Printed Pages — 3

# VU—87–Sahit. Shas. (Supp.)

# वरिष्ठ उपाध्याय पूरक परीक्षा, 2013

## साहित्य-शास्त्रम्

समय : $3\frac{1}{4}$ घंटे

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. मेघालोके सुखिनोऽपि चेतः कीदृशं भवति ? 1
2. प्राप्ते मित्रे क्षुद्रोऽपि कथं विमुखो न भवति ? 1
3. के न खलु मन्दायन्ते ? 1
4. कुत्र श्रुतिकटुः दोषः भवति ? 2
5. रौद्ररसस्य स्थायीभावः कः ? 2
6. लक्ष्यक्रमव्यङ्ग्यध्वनेः कति भेदाः भवन्ति ? नामानि लिखत । 2
7. तटस्थं लक्षणायाः उदाहरणं लिखत । 2
8. "कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु" इति सूक्तेः सप्रसङ्ग-भावार्थौ लेख्यः । 2
9. पादस्य किं लक्षणम् ? 2
10. कयोश्चिद् **द्वयोः** लक्षणं सोदाहरणं विवेचयत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) हेतुः (ii) सिद्धिः (iii) कार्यम् ।
11. ओजगुणस्य संगतिपूर्वकं लक्षणोदाहरणे लिखत । $1\frac{1}{2} + 1\frac{1}{2} = 3$

    **अथवा**

    "श्यामला कोमला बाला रमणं शरणं गता" इत्यत्र को गुणः ? संगतिरपि कार्या ।
12. कयोश्चिद् **द्वयो**रलंकारयोः संगतिपूर्वकं लक्षणोदाहरणे विवेचयत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) यमकः (ii) दीपकम् (iii) निदर्शना ।
13. प्रस्तुतोदाहरणेषु **द्वौ** अलंकारौ परिचीय तयोः लक्षणोल्लेखपूर्वकं संगतिः प्रदर्शनीया — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) अमन्दानन्दसन्दोहस्वच्छन्दास्पदमन्दिरम् ।
    (ii) स्त्रीभिः कामः प्रियैश्चन्द्रः कालः शत्रुभिरैक्षि सः ।
    (iii) पश्य नीलोत्पलद्वन्द्वान्निः सरन्ति शिताः शराः ।
14. लक्षणायाः लक्षणं वर्णयत । 3
15. व्यञ्जनायाः स्वरूपं स्पष्टयत । 3
16. अभिधायाः स्वरूपं विलिख्य तद्भेदान् वर्णयत । 3
17. केषाञ्च **चतुर्णां** दोषाणां लक्षणोदाहरणानि संगतिपूर्वकं लिखत — $4 \times 1 = 4$

    (i) च्युतसंस्कृतिः (ii) निहतार्थः (iii) अवाचकम्
    (iv) अप्रतीतम् (v) व्याहतत्वम् (vi) सन्दिग्धम् ।
18. निम्नलिखितालंकारयुग्मेषु **द्वयोः** परस्परं भेदः प्रदर्शनीयः — $2 + 2 = 4$

    (i) विभावना — विशेषोक्तिः
    (ii) अनुप्रासः — श्लेषः
    (iii) तुल्ययोगिता — दृष्टान्तः ।
19. कयोश्चिद् **द्वयोः** स्वरूपोदाहरणे विवेचयत — $2 + 2 = 4$

    (i) शृङ्गाररसः (ii) अद्भुतरसः (iii) रौद्ररसः ।

20. निम्नलिखितेषु **द्वयोः** लक्षणं विलिख्य उदाहरणेषु संगमयत — 2 + 2 = 4

(i) अगूढम् (ii) अस्फुटम् (iii) संदिग्धप्राधान्यम् ।

21. सप्रसंग-व्याख्या कार्या — 5

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।
असौ न मन्यते कस्मादनुष्णनलं कृती ॥

**अथवा**

जयदेवानुसारेण शब्दस्य सभेदं निरूपणं कुरुत ।

22. अधोलिखितश्लोकस्य छन्दोऽलंकारनिर्देशपूर्वकं सप्रसंग-व्याख्या कार्या — $\frac{1}{2} + \frac{1}{2} + 1 + 3 = 5$

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः ।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥

**अथवा**

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वी
तोयोत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः ॥

23. संस्कृतगीतिकाव्येषु मेघदूतस्य वैशिष्ट्यं वर्णयत । 5

24. सप्रसंगो भावार्थो लेख्यः — 1 + 4 = 5

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ॥

**अथवा**

तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै -
रापन्नार्तिप्रशमनफलाः संपदी ह्युत्तमानाम् ॥

25. (क) कयोश्चिद् **द्वयोः** छन्दसोः लक्षणोदाहरणे विलिख्य संगतिरपि कार्या — 3 + 3 = 6

(i) शालिनी (ii) चन्द्रलेखा (iii) मञ्जुभाषिणी ।

(ख) प्रस्तुतोदाहरणे गणनिर्देशपूर्वकं छन्दः परिचीय तल्लक्षणमपि लेखनीयम् — 2

नात्मनो न सुहृदां प्रियं कृतम् ।